.. shrI bhadragiripati sa.nstutiH ..

# ॥ श्री भद्रगिरिपति संस्तुतिः ॥

धरणीतनया रमणी कमनीय सिताङ्गो मनोहररूप हरे ।
भरताग्रजराघव दाशरथे विजयी भव भद्रगिरींद्रपते।१
बुधलक्षणलक्षण सर्वविलक्षण लक्ष्मणपूर्वजराम हरे ।
भवपाशविनाशक हे नृहरे विजयी २
धरचक्र धनुश्शरदीप्त चतुष्करचक्रभवाद्यवादिविभो ।
परचक्रभयंकरहे भगवन् विजयी।३
अधिनीरजजन्मसुरेशमुनींद्रविलक्षणलक्षणदक्षपते
नवकंधरसुंदरदिव्यवतनो विजयी।४
सततः प्रततः प्रचरैः करुणा भरणैस्तव दिग्विसरैर्नमित ।
स्मरणाणाभिरतं भवतं सततं कुरु मा मिह भद्रगिरींद्रपते।५
सचतुर्मखषण्मुखपंचमुख प्रमुखाखिलदैवतमौलिमणे ।
शरणागतवत्सल ! सारनिधे !परिपालय मां वृषशैलपते।६
अभिरामगुणाकर !दाशरथे !जगदेकदनुर्धर !धीरमते !
रघुनायक !राम !रमेश !विभो !वरदो भव देव !दयाजलधे।७
इति भद्रगिरिपति संस्तुतिः

Please send corrections to sanskrit@cheerful.com
Last updated April 1, 2002